RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
नमस्यामो देवान्नन
हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि
प्रतिनियतकमैकफलदः। फलं
कर्मायत्तं किममरगणैः
किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न
येभ्यः प्रभवति॥94॥
(नीतिशतकम्)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
अपि च - ब्रह्मा येन
कुलालबनियमितो
ब्रह्माण्डभाण्डोदरे विष्णुर्येन
दशावतारगहने क्षिप्तो
महासंकटे। रुद्रो येन
कपालपाणिपुटके भिक्षाटनं
कारितः सूर्यो भ्राम्यति
नित्यमेव गगने तस्मै नमः
कर्मणे॥95॥ (नीतिशतकम्)

卐 वर्षम्-१५ 卐 अंकः-०८ (३४४) नवदेहली 卐 १६ अक्टूबरमासः २०२५तः ३१ अक्टूबरमासः २०२५ पर्यन्तम् 卐 विक्रमसंवत्-२०८२ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२५ 卐 पृष्ठम्-८

## केन्द्रीयसंस्कृतविश्वविद्यालयेन साहित्योत्सवः समायोजितः

जयपुर। स्थापनादिवसस्य अङ्गतया राजस्थानराज्यस्य जयपुरपरिसरे केन्द्रीयसंस्कृतविश्वविद्यालयेन साहित्योत्सवः (कार्तिककृष्णनवम्याम् - १५/१०/२०२५) अमितोत्साहेन समायोजितः।

उद्घाटनसत्रे समागतः विशिष्टातिथिः पूर्वसांसदः मान्यः सुमेधानन्दसरस्वतीवर्यः अवोचत् यत् संस्कृतभाषायां भाषामहे वयम् इति गर्वमेव अनुभवामः। विश्वविद्यालयः एषः बहुभिः तीर्थैः ( आचार्यैः) शोभतेतमाम् इति।

कार्यक्रमस्य मुख्यातिथिः राजस्थानराज्यस्य नगरविकासमन्त्री श्रीमान् झाबरसिंहखर्रावर्यः अब्रवीत् यत्



वसुधैव कुटुम्बकम् इति भावनां जागरयितुं संस्कृतभाषा पूर्णशः समर्था इति। पुनश्च राजस्थानराज्यसर्वकारः जयपुरे केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिसरविस्ताराय अपेक्षितां भूमिं दातुम् उत्सुकोऽस्ति इत्यपि सभामुखं समुदघोषयत्। तदग्रे कुलगुरुः आचार्यश्रीनिवासवरखेडीवर्यः आदौ पञ्चपञ्चाशत्तमस्थापनादिवसस्य शुभाशयान् व्याहृत्य अकथयत् यत् विश्वविद्यालयस्य पञ्चपञ्चाशद्वर्षाणि सञ्जातानि इत्युक्ते एषः प्रवृत्तिकालः न तु निवृत्तेः। एतस्य विश्वविद्यालयस्य सुदीर्घः इतिहासः वर्तते। संस्कृतकार्यकरणदृष्ट्या एषः तरुणः सक्रियश्च विश्वविद्यालयः। अत्र राजस्थाने साम्प्रतिकेन सर्वकारेण सुयोग्यां भूमिं सम्प्राप्य विश्वविद्यालयः विद्युदिव विद्योतिष्यते इत्यत्र नास्ति मम संशीतिरिति। शेषभागः द्वितीयेपुटे

## पतञ्जलिगुरुकुलस्य अष्टमः वार्षिकोत्सवः सम्पन्नः

भारतीयशिक्षामण्डलस्य अन्तर्गते पतञ्जलगुरुकुले वार्षिकोत्सवः पतञ्जलिविश्वविद्यालये बृहद् सभागारे विधिवत् सम्पन्नः। तस्मिन् अवसरे पतञ्जलियोगपीठस्य परामाध्यक्षः स्वामी रामदेवः शीर्षस्थसतां मध्ये उपस्थितः आसीत्। स्वामी रामदेवः अवदत्- "आदिमेषु गुरुकुलेषु गुरुशिष्यपरम्परायां केवलं ज्ञानदानं न, किन्तु नीतिः, चरित्रशुद्धिः, वाणीव्यवहारे मृदुता, आचरणे पवित्रता च शिक्ष्यन्ते स्म। तस्मात् प्राचीनगुरुकुलेषु शिक्षिताः विद्यार्थी विश्वस्य नेतृत्वं कर्तुं समर्थाः आसन्। अद्य पतञ्जलगुरुकुलमपि तस्यैव ऋषिपरम्परायाः अनुकरणं कृत्वा विद्यार्थिनः विश्वनेतृत्वाय सज्जान् करोति।"



स्वामी अवदत् यन्महर्षिदयानन्दः, भगवान् बसवन्नः, सन्तमणिबाडेश्वरः, सन्तज्ञानेश्वरः, सन्तरविदासः, सन्तकबीरदासः इत्यादयः ऋषयः समाजे विद्यमानाः कुरीतयः, बन्धनानि, भेदभावभित्तिम् च उद्धृत्य एकत्वस्य, सहअस्तित्वस्य, सामञ्जस्यस्य च सन्देशं दत्तवन्तः। ते अवदन् यत् सर्वसृष्ट्यां एकः एव ब्रह्म, एकः एव परमात्मा सर्वत्र व्याप्य अस्ति। एते दिव्यसन्देशाः सनातनस्य शाश्वतसत्यं च मानवजातीं प्रति प्रामाणिकतया संप्रेषितवन्तः। वेदेषु कोऽपि भेदो नास्ति इति अपि ते अवदन्। पतञ्जलगुरुकुलस्य आचार्यगणाः विद्यार्थिनां चरित्रनिर्माणे अत्यन्तं महत्वपूर्णं कार्यं कुर्वन्ति।"

जूनापीठाधीश्वरः आचार्यमहामण्डलेश्वरः स्वामी अवधेशानन्दगिरिः अवदत्च "पतञ्जलगुरुकुलं भारतस्य कालजयीं मृत्युंजयीं संस्कृतिं, आर्षपरम्परां, वैदिकसंवेदनां च संरक्षित्य संवर्धयन् एकः अद्भुतः प्रयोगशालारूपः संस्थानम् अस्ति। अस्मिन् गुरुकुले विद्यार्थिनां मानवीयचेतनाया ऊर्ध्वस्वरूपं जागरितं भवति।" शेषभागः द्वितीयेपुटे

## देववाणीपरिषदः अष्टात्रिंशः पण्डितराजमहोत्सवः

नवदेहली (अमृता)। ०७/१०/२०२५ तमे दिनाङ्के श्यामाप्रसादमुखर्जीमहिलामहाविद्यालये शरत्पूर्णिमायाः २०८२ अवसरे देववाणीपरिषदः श्यामाप्रसादमुखर्जीमहिलामहाविद्यालस्य च संस्कृतविभागस्य संयुक्ततत्त्वावधाने अष्टात्रिंशः पण्डितराजमहोत्सवः आयोजितः। अवसरेऽस्मिन् पण्डितराजसम्मानः विद्वद्भाषणं कविगोष्ठी गङ्गालहरीगानस्पर्धा चाभवन् । कार्यक्रमस्य शुभारम्भः दीपदीपनेन मङ्गलाचरणेन चाभवत् । महाविद्यालयस्य छात्राः आकृष्टिः अग्रवालः, श्रीवल्लिका, इशिका राजः, नित्या, साइना गुप्ता च श्रीमच्छङ्कराचार्यकृतस्य अम्बाष्टकगीतस्य अश्वधाटीछन्दसि केरलप्रासशैल्यां मङ्गलाचरणं कृतवत्यः। एतदनु ऊर्णावस्त्रेण अतिथीनां स्वागतपूर्वकं परिषत्प्रबन्धकेन श्रीमता आनन्दवर्धनशुक्लेन स्ववचोभिः समेषां स्वागतं कृतम्। डॉ. ऋषिराजपाठकेन



पण्डितराजसम्मानोद्घोषणपूर्वकं डॉ. महेशचन्द्रशर्मगौतमवर्यस्य नामोल्लेखः कृतः। परिषत्सहसचिवेन डॉ. योगेशशर्मणा डॉ. महेशचन्द्रशर्मगौतमविषयकः प्रशस्तिपाठः कृतः। देववाणी-परिषदः सदस्यैः डॉ. ऋषिराजपाठकेन, डॉ. योगेशशर्मणा, श्रीमता आनन्दवर्धनशुक्लेन, श्रीविनोदबब्बरेण, श्रीवेदप्रकाशशर्मणा, श्रीमत्या रमादेवीशुक्लया च श्यामप्रसादमुखर्जीमहिलामहाविद्यालयस्य च आचार्यैराचार्याभिः डॉ. अमितकुमारशर्मणा, डॉ. रूब्या, डॉ. प्रवीणकुमार्या, डॉ. अङ्कुरत्यागिना, डॉ. पूजाबुन्देल इत्यनया, डॉ. घनश्यामयादवेन च डॉ. महेशचन्द्रशर्मगौतमाय पण्डितराजसम्मानार्पणं विहितम् । पण्डितराजमहोत्सवेऽस्मिन् मुख्यातिथिरुपेण श्रीमोहनलालशर्मा, विशिष्टातिथिरुपेण प्रो. गुरदाससिंहः, सारस्वतातिथिरूपेण च श्रीयोगेन्द्रसिंहजोशी उपस्थिताः आसन्। शेषभागः द्वितीयेपुटे

## आचार्यभद्रेशदासजी महाराजः सरस्वतीसेवासम्माननाम्ना प्रतिष्ठितेन पुरस्कारेण विभूषितः

अहमदाबादे, गुजरातराज्ये, के.के. बिड़ला फाउण्डेशननाम्ना संस्थया साहित्यदर्शनयोः क्षेत्रयोः असाधारणं योगदानं कृतवतां विदुषां प्रति प्रतिवर्षं प्रदीयमानः "सरस्वतीसम्मानः" इति प्रतिष्ठितः पुरस्कारः वर्षे



२०२४-२५ तमे स्वामिनारायणमन्दिरस्थितस्य अक्षरधामस्य विद्वान् आचार्यः श्रीभद्रेशदासजी महाराजः प्राप्तवान्। तस्मै स्वामिनारायणसिद्धान्तसुधा इति ग्रन्थरचनायाः निमित्तेन एषः सम्मानः प्रदत्तः। अस्य पुरस्कारस्य वितरणं गुजरातमहाराष्ट्रयोः माननीयराज्यपालाभ्यां आचार्यदेवव्रतजीमहाभागाभ्यां तेषां पावनकरकमलाभ्यां कृतम्। आचार्यभद्रेशजीमहाराजे १५ लक्षरूप्यकाणां सम्मानराशिः प्रशस्तिपत्रं च प्रदत्तम्। अवसरे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य उज्जयिन्यां प्रतिष्ठितस्य कुलगुरोः आचार्यशिवशङ्करमिश्रस्य सविशेषं सन्निधिः अभवत्। तथा देशस्य विविधेषु प्रतिष्ठितेषु विश्वविद्यालयेषु कुलगुरवः, माननीयविद्वांसः, पूज्यसन्तजनाश्च अपि तत्र सप्रेमं उपस्थिताः आसन्। इति आचार्यभद्रेशदासजीमहाराजस्य सरस्वतीसेवासम्मानप्राप्तिवृत्तान्तः।

# गङ्गानाथझापरिसरे भारतीयज्ञानपरम्पराविषयिण्याः कार्यशालायाः समारम्भः

-दीनदयालशुक्लः

केन्द्रीयसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरान्तर्गतभारतीयज्ञानपरम्पराकेन्द्रेण द्विसहस्राधिकपञ्चविंशतितमे खीष्टाब्दे दशममासस्य त्रयोदशे दिनाङ्के (१३.१०.२०१५) परिसरीयसभागारे भारतीयज्ञानपरम्परायाम् अनुसन्धानम् इति विषयम् अधिकृत्य षष्ठदिवसीयायाः राष्ट्रियकार्यशालायाः उद्घाटनसत्रस्य आयोजनम् अभवत्। अस्यां कार्यशालायां देशस्य ख्यातिलब्धैः विद्वद्भिः प्रख्यातशिक्षाविद्भिश्च व्याख्यानानि



प्रदास्यन्ते।

उद्घाटनसत्रस्य मुख्यातिथिः भारतशासनस्य शिक्षामन्त्रालयस्य भारतीयज्ञानपरम्पराकेन्द्रस्य राष्ट्रियसमन्वयकः प्रो.मूर्तिगन्टी.एस्. आसीत्। सः भारतीयज्ञानपरम्पराक्षेत्रे अनुसन्धानस्य सम्भावनाः लब्धावसरान् च उपस्थितान् सर्वान् अवबोधयत्। भारतीयज्ञानपरम्परायाः अध्ययनं भारतीयसंस्कृतेः परिचयाय सुयोग इति प्रोक्त्वा स छात्रान् अस्मिन् क्षेत्रे अनुसन्धानाय प्रेरयामास। स्ववक्तव्ये सः आलेखचित्राणां प्रस्तुतीकरणस्य च माध्यमेन वर्तमानदृष्ट्या प्राचीनायाः गौरवशालिन्याश्च परम्परायाः समृद्धेः अनुभवमेव भारतीयज्ञानपरम्परायाः आधारं प्रत्यपादयत्।

उद्घाटनसत्रस्य सारस्वतातिथिः हैदराबादविश्वविद्यालयस्य निवृत्ताचार्यः प्रो.सुब्रह्मण्यम्कोराडः अभवत्। सः स्वव्याख्याने भारतीयज्ञानपरम्परायाः गाम्भीर्यम् अवबोधयत्। स्वसारगर्भितवचनेषु सः वेदेषु मीमांसाशास्त्रे च उपलब्धानां शब्दानां विश्लेषणम् अकरोत्। कार्यक्रमस्य विशिष्टातिथिः केन्द्रीयसंस्कृतविश्वविद्यालयस्य देवप्रयागस्थस्य रघुनाथकीर्तिपरिसरस्य निदेशकः प्रो.सुब्रह्मण्यम्पी.वी.बी. अपि आसीत्। सः स्वभाषणे भारतीयज्ञानपरम्परया विश्वस्मै कृतम् अवदानम् इति विषयं विस्तरेण चर्चयामास। तेन अनुसन्धानस्य भारतीयाः पद्धतयः शास्त्रीयग्रन्थेषु निहितं ज्ञानं तथा आधुनिकानुसन्धानाय तेषाम् उपयोगश्च प्रकाशमानीतः। कार्यक्रमेऽस्मिन् भारतीयज्ञानपरम्परायाः मूर्धन्यविद्वान् प्रो.पेजात्तेयरामकृष्णः अन्यतमः विशिष्टातिथित्वेन समुपस्थितः आसीत्।

कार्यशालायाः उद्घाटनसत्रस्य अध्यक्षतां वहन् परिसरनिदेशकः प्रो.त्रिपाठिललितकुमारः स्वकीयम् अध्यक्षीयम् उद्बोधनम् अददात्। सः भारतीयज्ञानपरम्परायाम् अनुसन्धानस्य गुणवत्तायां मौलिकतायां च विशेषबलम् अददात। इदम् अनुसन्धानमात्रे न सीमयेत् अपितु भारतीयसंस्कृतेः सभ्यतायाश्च दिव्यतायाः अनुभवाय विशेषः अवसर इति सः अकथयत्। तेनोक्तं यत् भारतीयज्ञानपरम्परायाः अध्ययनं न केवलं ज्ञानं वर्धयति अपितु अस्माकं सांस्कृतिकमूलानि अपि दृढीकरोति। देशस्य विभिन्नभागेभ्यः समागतान् प्रतिभागिनः छात्रान् च स्वागत्य सः सर्वेभ्यः इमां कार्यशालाम् अतिमहत्त्वपूर्णां विशिष्टां च न्यगदत्।

कार्यक्रमस्य प्रारम्भे उपस्थितानां सर्वेषाम् अतिथीनां शिक्षकाणां विदुषां च स्वागतं परिसरस्य उपनिदेशकः प्रो. सरोदेदेवदत्तः अकरोत। उद्घाटनसत्रस्य सञ्चालनं परिसरीयसहायकाचार्यः डो.त्रिवेदियशवन्तकुमारः सम्पादयामास। अस्यां कार्यशालायां देशस्य विभिन्नराज्येभ्यः शोधच्छात्राः अध्यापकाश्च भागं गृह्णन्ति। उद्घाटनसत्रे धर्मशास्त्रविभागाध्यक्षः प्रो.पाण्डेयरामकृष्णः परमहंसः वेदविभागाध्यक्षः प्रो.मिश्रमनोजकुमारः डो.पाण्डेयसुरेशः श्रीः मिश्रः अङ्कितः श्रीः तिवारिराजेशकान्तः सुश्रीः लङ्केअश्विनी तथा परिसरीयाः सर्वे सदस्याश्च उपस्थिताः आसन्।

# मर्यादापुरुषोत्तमः भगवान् रामः साक्षाद् धर्मस्य प्रतिमूर्तिः-प्रो० रामसलाही द्विवेदी

डॉ० दिनेशचौबे, उज्जयिनी

महर्षेः वाल्मीकेः जयन्तुत्सवे महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालये उज्जयिन्यां संस्कृतसाहित्यविभागेन "रामो विग्रहवान् धर्मः" इति विषयपरः विशिष्टः व्याख्यानकार्यक्रमः आयोजितः। कार्यक्रमेस्मिन् मुख्यवक्तारूपेण श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः (नवदेहली) इत्यस्य व्याकरणविभागाध्यक्षः प्रो० रामसलाहीद्विवेदीवर्यः स्वीयं बीजवक्तव्यं प्रददौ।

महोदयः उक्तवान् यत्ख्र भगवान् श्रीरामः श्रीकृष्णात् न भिन्नः, केवलम् अंशकलाविशेषमात्रेण भेदः दृश्यते। भगवान् रामः साक्षाद् धर्मस्वरूपः एव। ते एकं चरितकथानकं दृष्टान्तरूपेण निरूप्य उक्तवान्ख्र यदा लक्ष्मणः मेघनादवधाय प्रयातः, तदा सः स्वतरकशात् एकं बाणं निष्कास्य तस्मै शपथं दत्तवान् ख्र "यदि रामो धर्मवान् अस्ति, तर्हि मम बाणः मेघनादस्य अन्तं करोतु।" तदनन्तरं प्रो० द्विवेदी महोदयः अवोचत् यत् भगवान् रामः उत्तमः पुत्रः, उत्तमः पतिः, न्यायप्रियः च राजा आसीत। रामराज्यस्य विशेषतां विवृण्वन् आचार्यः द्विवेदी अवदत् - यदा एकस्यापि जनस्य राज्ये विरोधः नास्ति, तदा तत् एव रामराज्यमिति कथ्यते; एषा एव रामराज्यपरिभाषा।

अध्यक्षपदं धारयन् कुलगुरुः प्रो० शिवशङ्करमिश्रवर्यः भाषमाणः अवोचत्-भगवतः रामस्य अन्तः समस्ताः मानवीयगुणाः सन्निहिताः आसन्। कुलगुरुः वाल्मीकि-रामायणस्य विशेषतां निरूपयन् उक्तवान् यत् यावत् पृथिव्यां पर्वताः नद्याः च स्थिताः, तावत् अस्य लोके रामायणकथा जीवन्मयी भविष्यति। कार्यक्रमस्य संयोजकः डॉ० तुलसीदासपरोहा प्रास्ताविकं भाषणं कृत्वा अतिथिनां स्वागतं च अकरोत्। संचालनं डॉ० गङ्गाशरणव्यासेन कृतम्, आभारप्रदर्शनं डॉ० खोकनप्रामाणिकेन निष्पादितम्। अस्मिन् व्याख्यानकार्यक्रमे सर्वे विभागाध्यक्षाः, आचार्याः, शोधार्थिनः, छात्र-छात्राः अन्ये च समाजिकाः श्रोतृरूपेण उपस्थिताः आसन्।

## प्रथमपुटस्य शेषभागः केन्द्रीयसंस्कृतविश्वविद्यालयेन साहित्योत्सवः....

विश्वविद्यालयस्य आचार्याणां शास्त्ररक्षाविषये या आस्था सैव छात्ररक्षाविषये अपि सन्ततं स्यादेव। कुलगुरुरहं गुरुकुलच्छात्रः। शास्त्राण्यधीत्य एतावद्दूरं समागतोऽस्मि। अतः शास्त्ररक्षा अस्माकं



विश्वविद्यालयस्य लक्ष्यमस्ति। एतद्विषये कस्यापि भ्रान्तिः वा सन्देहो वा सुतरां मास्त्विति।

देवप्रयागे शृङ्गगिरौ तन्नाम उत्तरे दक्षिणे च शास्त्रोत्कर्षकेन्द्रमाध्यमेन वयं शास्त्ररक्षां शिक्षां च विस्तरेण कुर्मः। अन्यत्र आधुनिकविद्यामध्येतुम् अवसरान् कल्पयामः। विविध विद्यास्थानानि सन्तीति विज्ञेयम।अतः सर्वविधा सर्वाङ्गपूर्णा च विद्या सर्वेभ्यः सर्वाभ्यश्च देया इत्येव अस्माकं लक्ष्यम् इत्यपि।

क्रियान्वितयोजनानां घोषणा सभामुखं विहिता। राजस्थानपत्रिकायाः सम्पादकस्य ज्ञानवृद्धस्य वयोवृद्धस्य च डा. गुलाबकोठारीवर्यस्य सम्माननं कुलगुरुप्रमुखैः सभामुखं सम्पादितम्। जयपुरपरिसरनिदेशकः आचार्यः वाई.एस्.रमेशवर्यः सर्वेषां स्वागतम् आतिथ्यं च यथोचितम् अकरोत्। अभिनन्दनपत्रवाचनमपि सर्वसम्मुखे अकरोत् ।शैक्षिकाधिष्ठाता आचार्यः मदनमोहनझावर्यः सर्वेभ्यः धन्यवादं ससन्तोषं समार्पयत्। विविध योजनानां वैशिष्ट्यं परिचयं च डा. प्रमोदकुमारबुटोलियावर्यः उपावर्णयत। डा.डम्बरुधरपतिवर्यः डा. राणी दाधीचवर्या च सुष्ठु सञ्चालनमकुरुताम्।

## प्रथमपुटस्य शेषभागः देववाणीपरिषदः अष्टात्रिंशः....

अवसरेऽस्मिन् 'संस्कृतसंवादः' इत्यस्याः पत्रिकायाः लोकार्पणमपि विहितम् । महाविद्यालयस्य संस्कृतविभागस्य च अध्यक्षा डॉ. प्रवीणकुमारी कार्यक्रमे अध्यक्षीयभाषणं प्रस्तुतवती । प्रथमवर्गीया सुश्रीः आद्या शर्मा श्लोकपाठेन विद्वद्गोष्ठ्याः आरम्भमकरोत् । महाविद्यालयस्य छात्राः काशवी नागरः, मञ्जू, राखी, रौनकः, मुस्कानः, वृन्दा एवं कलानिष्णातच्छात्रः कुमारः आदर्शः च पण्डितराजस्य विषयमधीत्य स्वविचारान् प्रस्तुतवन्तः। एतदनु मुख्यातिथिः सुश्रीः निधिः झा स्वीयवचोभिः छात्रान् समुद्बोधितवती। कलानिष्णातच्छात्रः दण्डपाणिराचार्यः छात्रा अनामिकासिंहः एवञ्च शोधार्थी ऋषभकुणालः स्वरचितकविताभिः सर्वान् आनन्दितवन्तः। अनन्तरं गङ्गालहरीगानस्पर्धासत्रस्य आयोजनमभवत् । सत्रे विभिन्नेभ्यः संस्थानेभ्यः छात्राः स्पर्धायां प्रतिभागं कृतवन्तः। हिन्दुमहाविद्यालस्य आयुषी सिंहः प्रथमस्थानं, मिरांडा-हाउस-महाविद्यालयस्य आनन्दमञ्जरी द्वितीयस्थानं, किरोड़ीमलमहाविद्यालयस्य च तमन्ना तृतीयस्थानं प्राप्तवत्यः। हंसराजमहाविद्यालयस्य सुन्दरम्, जवाहरलालनेहरुविश्वविद्यालयस्य सलोनी गौतमः, श्यामाप्रसादमुखर्जीमहिलामहाविद्यालयस्य आकृष्टिः अग्रवालः च सान्त्वनापुरस्कारान् प्राप्तवन्तः। निर्णायकरूपेण डॉ. अविनाशकुमारः, डॉ. अङ्कुरत्यागी डॉ. पूजा बुन्देलश्च आसन् । विभिन्नेषु सत्रेषु अनामिका सिंहः, दिव्या, रूपाली, अंशुः, मुस्कानः वर्षा, रीना च सत्रसंचालनम् अकुर्वन् तथा वृन्दा, शालनी, पूजा, प्रज्ञा भारती च धन्यवादज्ञापनं कृतवत्यः।

अवसरेऽस्मिन् देववाणीपरिषदः संरक्षिका श्रीमती रमादेवी शुक्ला, श्रीविनोदबब्बरः, डॉ. ब्रजेशगौतमः श्रीवेदशर्मा च स्वविचारान् प्राकटयन्। कार्यक्रमः श्भाति मे भारतम्श इत्यनेन गीतेन शन्तिपाठेन च सफलताम् अगच्छत् ।

## प्रथमपुटस्य शेषभागः पतञ्जलिगुरुकुलमस्य अष्टमः...



आचार्यबालकृष्णः अवदत्-"पतञ्जलगुरुकुलेन भारतीयसंस्कृतिः, सनातनपरम्पराः, मान्यताश्च दृढीभूताः। अत्र बालकाः केवलं ज्ञानं न प्राप्नुवन्ति, किन्तु संस्कारिताः अपि भवन्ति।"

परमार्थनिकेतनस्य ऋषिकेशस्थस्य परमाध्यक्षः स्वामी चिदानन्दमुनिः अवदत्ख्र "पतञ्जलगुरुकुलस्य बालकान् दृष्ट्वा मया यत् अनुभूतं, तत् अस्य युगस्य आवश्यकं - यत् भावीपीढिषु एते शाश्वतसत्यानि पुनरुद्धाट्यन्ताम्। भारतस्य वास्तविकइतिहासस्य मूलं सनातनमेव। अद्य समयः भारतं भारतदृष्ट्या द्रष्टुं प्राप्तः, अस्मिन् कार्ये पतञ्जलगुरुकुलं प्रमुखभूमिकां वहति।"

महामण्डलेश्वरः हरिचेतनानन्दजी महाराजः अवदत्- "अधुनातनकालादारभ्य एषा सन्तपरम्परा यः प्रतिष्ठां प्राप्नोति, तस्यां स्वामीरामदेवमहाराजः एकः महत्वपूर्णः कण्ठः। पतञ्जलगुरुकुलेन स्वामीरामदेवमहाराजेन सनातनस्य सन्देशः विश्वे प्रसारितः।"

कार्यक्रमे शैक्षणिके, क्रीडायाम्, शास्त्रस्पर्धायां च विजेतारः विद्यार्थिनः पुरस्कारैः सन्मानिताः। पतञ्जलगुरुकुलज्वालापुर, पतञ्जलिकन्यागुरुकुलं देवप्रयाग, पतञ्जलगुरुकुलं हरिद्वार इत्यादीनां विद्यार्थिभिः सांस्कृतिककार्यक्रमाः, नृत्यानि, नाट्यप्रस्तुतयः च प्रदर्शिताः, येन सर्वे अतिथयः हर्षविभोराः अभवन्।

अष्टमे वार्षिकोत्सवे साध्वीभागवतीजी, भारतीयशिक्षामण्डलस्य कार्यकारिण्याः अध्यक्षः डॉ. एन.पी. सिंह इत्यादयः विद्याथिर्यः आशीर्वचनैः अभिषिक्तवन्तः। अस्मिन् अवसरि माता गुलाबदेवी, डॉ. यशदेवशास्त्री, साध्व्याचार्यदेवप्रिया, डॉ. ऋतम्भराशास्त्री, बह्व्यः साध्व्यः च- अंशुलशर्मा, पारूलशर्मा, देवमयी, देवसुधा, देवाराधना, देवश्रुति, देवाश्रिता, देवांजला, देवशक्ति-तथा स्वामी ईशदेवः, स्वामी विरक्तदेवः च उपस्थिताः आसन्। इति पतञ्जलगुरुकुलस्य अष्टमवार्षिकोत्सववृत्तान्तम्।


### पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुक्लः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,Delhi-110053**
**IFC Code- IOBA0002249**

# भारतीयमूल्यसंरक्षणाय संस्कृतज्ञानमावश्यकम्-कुलगुरुः प्रो०शिवशङ्करमिश्रः

डॉ० दिनेशचौबे,

उज्जयिनी। महर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालये उज्जयिन्यां विशिष्टसंस्कृतविभागस्य सहकारे संस्कृतभाषाप्रशिक्षणवर्गस्य सोमवासरे शुभारम्भः सञ्जातः। मुख्यातिथिरूपेण आगतेन महन्त श्रीराघवेन्द्रदासेन कथितं यत्-संस्कृतभाषा अनादिकालात् निरन्तरं जीवन्मयी विद्यमाना

विशिष्टातिथिरूपेण डॉ० लोकेशकुमारलङ्गान्याख्येन प्रोक्तम् यत् संस्कृतभाषा न वर्गविशेषस्य भाषा प्रत्युत सर्वजनानां इयं भाषा। अस्याम् अन्तर्निहितायाः ज्ञानसम्पदः विषये जनजागरणं करणीयम्। स्वभाषासंस्कृतेः विषये अस्माभिः स्वाभिमानः धारयित्वा तस्याः प्रचारप्रसारौ करणीयौ।




अस्ति। म्लेच्छराज्यकालेऽपि अस्माकं विद्वद्भिः अस्याः भाषायाः संरक्षणं सततं कृतम। संस्काराणां जननी संस्कृतभाषा, सा एव अस्माकं संस्कृतेः रक्षिका, भारतभूमेः आधारशिला चास्ति। अध्यक्षस्थाने विराजमानेन कुलगुरुणा प्रो० शिवशङ्करमिश्रवर्येण उक्तं यत् स्वीयइतिहासज्ञानाय देववाण्याः अध्ययनं कर्तव्यम्, संस्कृतविना तदसाध्यमेव। संस्कृत एव सर्वभाषाणां संवर्धिका, यस्या अध्ययनात् व्यक्तेः सर्वतोमुखविकासः, आत्मिक उन्नतिश्च भवति। अन्यासु भाषासु तादृशं सामर्थ्यं नास्ति। संस्कृतेः सकलज्ञानविज्ञानकलासङ्ग्रहः निहितः अस्ति। अत एव नूतनभारतीयशिक्षानीतौ संस्कृतभाषा प्रमुखतया योजिता। भारतीयमूल्यरक्षणाय संस्कृतज्ञानमावश्यकम्। अयं कालः संस्कृतगौरवबोधस्य कालः।

विशिष्टातिथिः श्रीमान्गौरवधाकडः कार्यपरिषद्सदस्यश्च उक्तवान् यत् संस्कृतम् सर्वयुगानां भाषा। अस्यामेव भाषायां विश्वस्य समग्रं ज्ञानविज्ञानं निहितम्। अद्य सम्पूर्णं विश्वं तन्त्रज्ञानस्य नूतनमित्यानां प्राप्तये संस्कृतभाषायाः साहाय्यम् उपयुङ्क्ते। संस्कृतविना अस्माकम् उन्नतिः अपूर्णा भवेत्। अतः संस्कृतभाषायाः महत्त्वं ज्ञात्वा तस्याः संवर्धनं करणीयम्। तस्य मतानुसारं सांगठनिककौशलविकासे अपि संस्कृतसूत्राणि प्रेरणादायिनि भवन्ति। संस्कृतभाषा वैज्ञानिकस्वरूपा सर्वभाषाणां जननी चास्ति। कार्यक्रमस्य भूमिका विभागाध्यक्षया विशिष्टसंस्कृतविभागस्य डॉ० पूजोपाध्यायया प्रस्तुता। संचालनम् आभाषशर्मणा कृतम्, आभारप्रदर्शनं डॉ० सन्तोषकाण्डपालेन निष्पादितम्। अस्मिन् प्रशिक्षणवर्गे एकाधिकशतं (१२०) छात्राः सहभगिनः सन्ति।


Tele No. 011-46060501
Website: www.slbsrsv.ac.in

**Shri Lal Bahadur Shastri National Sanskrit University**
**(Central University)**
B-4, Qutub Institutional Area, New Delhi-110016

## श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये नवदेहल्यां

## विज्ञापन संख्या-०३/२०२५

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये (नवदेहल्यां) एकस्य सहाचार्यस्य (सर्वदर्शने), एकस्य सहायकाचार्यस्य (शिक्षायाम्), एकस्य सहायकाचार्यस्य (धर्मशास्त्रे) एकस्य पुस्तकालयाध्यक्षपदस्य च नियुक्तये योग्यानाम् अभ्यर्थिनां सद्यस्कमाध्यमेन आवेदनानि आमन्त्र्यन्ते। पदसम्बद्धाः योग्यताः, नियमाः, आवेदनशुल्कं, आवेदन-समर्पणदिनांकः नियुक्तेः अन्यनियमाः सत्त्वानि वा विश्वविद्यालयस्य अणुसंकेते www.slbsrsv.ac.in विश्वविद्यालयानुदानायोगस्य सूक्ष्मस्थले (https://curec.samarth.ac.in/index.php/search/site/index). इत्यत्र संस्थापितानि सन्ति। सद्यस्कावेदनस्य अन्तिमतिथिः १७.११.२०२५ इति वर्तते ।

कुलसचिवः




श्री बद्रीनाथधाम्नः परम आदरणीयस्य पूज्याचार्यश्रीमतो रविन्द्रप्रसादभट्टस्य (वेदपाठिनः ) जन्मदिनं हृदयङ्गताभिः शुभकामनाभिः अभिनन्द्यते। भवतः दिव्यज्ञानं, वेदविद्यायाः अभ्यासः च अनन्तकालपर्यन्तं सम्पूर्णजनहिताय प्रकाशमानः भवतु।


सर्वसंपदां, दीर्घायुष्यं स्वास्थ्यं, आनन्दं च भवतः जीवनम् अंगीकृत्य, सर्वत्र मान्यता वन्दनीयता प्राप्नुयात्। भवतः ज्ञानं धर्मं समाजम् उज्जवलितं कुर्यात। भक्तजनानां कल्याणाय भवान् सदैव प्रवृत्तः भूत्वा, बद्रीनाथधाम्नः पवित्रतां, धर्मस्य प्रचारं च निरन्तरं सम्पादयेत्।

भवतः जीवनं सदैव धर्मे, ज्ञाने, भक्तौ, सेवायां च प्रवर्तेत। प्रत्येकं दिनं नवीनांशम् उन्नतिं, सौभाग्यं, सौख्यं च आनयेत्। जन्मदिनं केवलं स्मरणीयदिवसः न भवति अपितु नवीनसंकल्पानां, प्रेरणायाः, स्वास्थ्यस्य च प्रतीकः भवतु। बद्री विशालस्य आशीर्वादेन अनन्तकालपर्यन्तं प्रवर्ततां सन्मार्गे भवतः मार्गदर्शनं, शिक्षा, प्रेरणा च सदैव समस्तानां बद्रीविशालकृपाभाजां कल्याणाय प्रकाशमानं भवतु।


**शुभेच्छुः - आचार्यो धीरज मैठाणी**







# दीपावल्याः विधिनिषेधौ कर्मकालश्च



**आचार्यः राजेशः बेंजवाल,**
कामख्या-अर्धत्र्यम्बक-मठ,
तंत्रकुल संस्थापकः,
तंत्रकुलस्य १५,०००-वर्षीय-पञ्चाङ्गकर्ता

**धनत्रयोदशी - शनिवार, १८ अक्टूबर**

धनत्रयोदशीमध्ये प्रातःकाल स्नात्वा त्रयोदशी कृत्वा दन्तधावनं कर्तव्यम्। श्लोकानुसारं षत्रिरात्र नियमं कृत्वा गोविन्दे भक्तितत्परः

अयं त्रिरात्रं नियमः अत्यन्त फलप्रदः। संध्याकाले यमदीपं प्रज्वाल्य बलिदानं कर्तव्यम्  मन्त्रः-

'मृत्युना पाशदण्डाभ्यां कालेन च मया सह।
त्रयोदश्यां दीपदानात् सूर्यजः प्रीयतामिति ।।
दीपदानं तथा अभ्यंगस्नानं अनिवार्यम्।

**कालीचतुर्दशी - रविवासरः, १९ अक्टूबर**

रात्रिः ११:३८ - १२:२८ महाशक्ति-संध्या।
शक्तिपूजापरायणैः काली पूज्यते।
'महारात्रिः समुत्पन्ना चतुर्दश्यां मुनीश्वराः।
अतस्तदुत्सवः कार्यः शक्तिपूजापरायणैः ।।६२।।'

**नरक चतुर्दशी एवं दीपावली - सोमवासरः, २० अक्टूबर**

प्रातः ०५:१० - ०६:२३ अभ्यंगस्नानमुहूर्तः। स्नानकाले अपामार्ग तुंबीं च शिरसः उपरि त्रिवारं घूर्णयित्वा मन्त्रपाठः-

'सीतालोटसमायुक्त ! सकण्टकदलान्वित !
हर पापमपामार्ग ! भ्राम्यमाणः पुनः पुनः।।
स्नानानन्तरं यमतर्पणं कर्तव्यम्-
'यमाय धर्मराजाय मृत्यवे चाऽन्तकाय च।
वैवस्वताय कालाय सर्वभूतक्षयाय च।। ३९।।'

संध्याकाले ०७:०१ - ०८:१४ लक्ष्मी पूजनम्। स्वच्छं मण्डपं स्थाप्य पुष्पैः, पल्लवैः, वस्त्रैः लक्ष्मी पूज्यते। सुखसुप्तिका यथा - श्वेतवस्त्रैः शय्या। नैवेद्यम्-गव्यमध्ये जातिपत्रं, लवङ्गम्, ऐला, कर्पूरम् आदीनि मिश्रयित्वा लड्डुकं समर्पयेत्। प्रदोषे दीपदानं ख्र गृहे, मंदिरे, चतुष्पथि, नद्यां, पर्वते, वृक्षे चादिषु। रात्रौ नगरनार्यः शूर्प-डिण्डिमवादनम् अलक्ष्मीं निष्कासयेत्।

'एवं गते निशीथे च जने निद्रार्द्धलोचने।
निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाऽङ्गणात्।।

पितृ- अमावस्या एवं भैलो इति-मंगलवासरः, २१ अक्टूबर

प्रातःकाल स्नात्वा देवानां, पितघ्णां पूजनं च। पार्वण श्राद्धं दधिक्षीरघृतादिभिः। प्रदोषे तुला स्थाप्य हस्तो दीपकः, पितृ मार्गदर्शनम्।

'तुलासंस्थे सहस्रांशौ प्रदोषे भूत दर्शयोः ।।६६।।'

बलिपूजा, गोवर्धन पूजा एवं द्यूत क्रीड़ा - बुधवार, २२ अक्टूबर

पूजनीयः बलिराज्य उत्सवः। श्लोकः -

'दत्तं दैत्यपतेरित्थं हरिणा तद्दिनत्रयम्।
तस्मान्महोत्सवं चाऽत्र सर्वथैव हि कारयेत्।।

रात्रौ पुराणपठनं, द्यूतेन वा क्रीडा, किन्तु जीवहिंसा, मद्यपानम्, अवैध सम्बन्धऽ, चौर्य, विश्वासघातं च त्यज्यन्ताम्।

'जीवहिंसा सुरापानमगम्यागमनं तथा।
चौर्यं विश्वासघातश्च पञ्चौतानि मुनीश्वराः! ।।

यमद्वितीया / भ्रातृद्वितीय-गुरुवासरः, २३ अक्टूबर
अपराह्णे ०१:०९-०३:२४ तिलकमुहूर्त। मंगलस्नानम्।
ष्यदा स्नाति तदाऽभ्यङ्गस्नानं कुर्याद्विधूदये ।।४५।।'

गोवर्धनपूजा प्रातः ०६:२५-०८:४०वादने सायंकाले ०३:२५-०५:३९वादने च भ्रातृभगिनीभ्यां सम्बद्धं परम्परागतं मंगलकर्म संपन्नम्।

# तीर्थंकरमहावीरनिर्वाणदीपोत्सवः प्राचीनतमः संवत्सरश्च



प्रो.अनेकांतकुमारजैनः
आचार्य-जैनदर्शनविभागः
श्री लालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-१६

भारतीयसंस्कृतेः प्राचीनजैनधर्मेदीपावलीपर्वणः उत्सवस्य विशिष्टं मौलिकं कारणं विद्यते। ईसवीयसंवत्सरात् प्रायः पञ्चशतसप्तविंशतिवर्षपूर्वं, कार्तिकमासस्य कृष्णपक्षचतुर्दश्यां, स्वातिनक्षत्रे, जैनधर्मस्य चतुर्विंशतितीर्थंकरः भगवान्महावीरः, यः वर्तमानबिहारप्रदेशे पावापुरीनाम्नि स्थले आसीत्, तत्र निर्वाणं प्राप्तवान्।

स्वर्गात् देवाः तथाश्च भारतस्य जनाः अमावास्यायाम् प्रातःकाले जिनेन्द्रभगवन्तं पूजयित्वा निर्वाणलाडून् नैवेद्यरूपेण समर्प्यपवित्रदिनं हर्षेण उत्साहेन च अनुष्ठीयन्त।

अयं महोत्सवः ततः प्रारब्ध अद्यापि देशे विदेशे च अत्यन्तं आध्यात्मिकभावेन आचर्यते।

तस्मिन्नेव दिने रात्रौ शुभे मुहूर्ते तीर्थंकरमहावीरस्य प्रमुखः शिष्यः गणधरगौतमस्वामी

केवलज्ञानलक्ष्मीं प्राप्तवान्।

तिलोयपण्णत्त्यां आचार्ययतिवृषभेन(१ ई.) लिखितं-

**कत्तिय-किण्हे चोद्दसि,पज्जूसे सादि-णाम-णक्खत्ते ।**
**पावाए णयरीए,एक्को वीरेसरो सिद्धो ।।**[1]

अर्थात्वीरजिनेश्वरः कार्तिककृष्णचतुर्दश्यां प्रत्यूषकाले स्वातिनक्षत्रे स्थिते पावानगरीतःएकाकी सिद्धिं प्राप्तवान्।

एवं पूज्यपादस्वामिना अपि निर्वाणभक्त्यां लिखितम्[2]-

**अवसप्पिणीए चउत्थ समयस्स पच्छिमे भाए,अट्ठमासहीणे वासचउक्कमि सेसकालम्मि पावाए णयरीए कत्तिए मसस्स किण्हचउदसिए रत्तिए सादीए णक्खते,पच्चूसे भगवदो महदि महावीरो वड्ढमाणो सिद्धिं गदो ।**

अवसर्पिणीयचतुर्थकालस्य अन्ते, यत्रसार्धत्रयंमासम्चतुर्वर्षेभ्यः न्यूनंअवशिष्टम्आसीत्, कार्तिककृष्णचतुर्दश्यां रात्रौ स्वाति नक्षत्रे प्रत्यूषकाले[3] भगवान् वर्धमानमहावीरः पावानगरीं(वर्तमानविहारप्रान्ते स्थितः)निर्वाणं प्राप्तवान्।

एवमेव प्राकृतागमे 'कसायपाहुड' इत्यस्मिन् जयधवला-टीकायां (८ ई.)लिखितं -


**"कत्तियमासे किण्हपक्खचौदसिदिवसे केवलणाणेण सह एत्थ परिणिव्वुओ वड्ढमाणो,अमावसीए परिणिव्वाणपूजा सयलदेविहिं कया।"**

अर्थात्कार्तिककृष्णचतुर्दश्यां भगवान् वर्धमानो निर्वाणं गतः, अमावास्यायां सर्वे देवाः निर्वाणपूजां कृतवन्तः।

दिगम्बराचार्यजिनसेनमहाभागेन(९ ई.) 'हरिवंशपुराणे'[4] अपि विस्तरतः उक्तम् -

**जिनेंद्रवीरोखपि विबोध्य संततं, समन्ततो भव्यसमूहसन्ततिम् ।**
**प्रपद्य पावानगरीं गरीयसीं, मनोहरोद्यानवने तदीयके ।।**
**चतुर्थकालेखर्धचतुर्थमासवै-र्विहीनताविश्चतुरब्दशेषके ।**
**स कार्तिके स्वातिषु कृष्णभूतसु-प्रभातसन्ध्यासमये स्वभावतः ।।**
**अघातिकर्माणि निरुद्धयोगको, विधूय घातीन्धनवद् विबंधनः ।**
**विबन्धनस्थानमवाप शंकरो, निरन्तरायोरूसुखानुबन्धनम् ।।**
**स पञ्चकल्याणमहामहेश्वरः, प्रसिद्धनिर्वाणमहे चतुर्विधैः ।**
**शरीरपूजाविधिना विधानतः, सुरैः समभ्यर्च्यत सिद्धशासनः ।।**
**ज्वलत्प्रदीपालिकया प्रवृद्धया, सुरासुरैर्दीपितया प्रदीप्तया ।**
**तदा स्म पावानगरी समन्ततः, प्रदीपिताकाशतला प्रकाशते ।।**
**तथैव च श्रेणिकपूर्वभूभुजः, प्रकृत्य कल्याणमहं सहप्रजाः ।**
**प्रजग्मुरिन्द्राश्च सुरैर्यथायथं, प्रभुचमाना जिनबोधिमर्थिनः ।।**
**ततस्तु लोकः प्रतिवर्षमादरात्, प्रसिद्धदीपालिकयात्र भारते ।**
**समुद्यतः पूजयितुं जिनेश्वरं, जिनेन्द्रनिर्वाणविभूतिभक्तिभाक् ।।**

भगवतः महावीरः पावापुरी-नगरस्यमनोहारीउद्यानेउपविष्टः इतिसारांशःअस्ति। चतुर्थावधौयदावर्षत्रयंअष्टादशंमासत्रयंअवशिष्टम्आसीत्, तदास्वाति- नक्षत्रेकार्तिक- अमावस्यायाः दिने, सूर्योदयस्यसमये,



योग-निरोधःस्वभावतःसाधितः, शुक्ल-ध्यानद्वारासर्वान्कर्मान्विनाशयित्वा-निर्वाणस्यप्राप्तिःअभवत्। तस्मिन्कालेचतुर्निकायदेवताःविधि पूर्वकंभगवतः शरीरस्यपूजांकुर्वन्तिस्म। ततःसुरैःरत्नदीपमालैः नगरस्यआकाशः सर्वतःप्रकाशितःअभवत्। श्रेणिकायाःराजानःइत्यादयःभगवतः निर्वाण-कल्याणकस्यपूजां, पुनःरत्न-त्रयस्यचयाचनांकृत्वा, जनैःसहस्वस्थानानिअपिअगच्छत्। ततःपरं, भगवतःनिर्वाणंप्रतिभक्तियुक्तः विश्वस्यजीविनः भगवतः निर्वाणः स्मृत्यांदीपावलीपर्वम् आचरितुम् आरभन्त, तस्मात्कालात् आरभ्य प्रतिवर्षं भारतवर्षे जनाः दीपमालिकायाः द्वारा महावीरजिनेश्वरपूजां कुर्वन्ति।

एवं आलापपद्धतौ दिगम्बराचार्यदेवसेनः लिखति -**"अतीते वर्तमानारोपणं यत्र स भूतनैगमः, यथा-अद्य दीपोत्सवदिने श्रीवर्धमानस्वामी मोक्षं गतः।"** अतीतक्रियायाम् वर्तमानस्य आरोपः यत्र भवति स भूतनैगमनयः इत्युच्यते।

श्वेताम्बराचार्यशीलांकः (९ ई.)अपि 'चउप्पण्णमहापुरिसचरियायां'[5] उक्तं-

**'एवं सुरगणपहासमुज्ज्यं तम्मि दिणे सयलं महिमण्डलं दटठूण तह च्चेय कीरमाणे जणवएण 'दीवोसवो' त्ति पसिद्धिं गओ ।'(वद्धमाणसामिणिव्वाणं २७)**

**मयापि प्राकृतभाषायां गाथापञ्चकमाध्यमेन उक्तं -**

**जआअवचउकालस्ससेसतिणिवस्ससद्धअट्ठमासा।**
**तआहोहिअंतिमायमहावीरस्सखलुदेसणा।।१।।**
**कत्तियकिण्हतेरसेजोगणिरोहेणतेठिदोझाणे।**
**वीरोअत्थियझाणेअओपसिद्धझाणतेरसो।।२।।**
**चउदसरत्तिसादीएपच्चूसकालेपावाणयरीए।**
**तेगमियपरिणिव्वुओदेविहिंअच्चीअमावसे।।३।।**
**गोयमगणहरलद्धंअमावसरत्तिएयकेवलणाणं।**
**णाणलक्खीपूयायदीवोसवपव्वंजणवएण।।४।।**
**कत्तिसुल्लपडिवदाएदेविहिंगोयमस्सकयापूया।**
**णूयणवरसारंभोवीरणिव्वाणसंवच्छरो।।५।।**

**दीपपर्वस्य आध्यात्मिकभावः**

दीपावल्याः निमित्तं आतिशबाजीस्य प्राचीनं उल्लेखं न लभ्यते। जैनपरम्परायां पटाखादीनां प्रयोगः हिंसात्मकः मन्यते, यः पापकर्मबन्धस्य कारणं भवति। अतः पर्यावरणरक्षणं च आत्मशुद्धिः च अत्र प्रमुखार्थौ स्तः।

दीपोत्सदीपावलि-दिनेअग्न्यस्त्रणांप्राचीन-उल्लेखःनदृश्यते, जैनपरम्परानुसारं, अग्न्यस्त्रणांविस्फोटनं, इत्यादीनि, अत्यन्तंहिंसात्मकंभवतिचेत्, पापबन्धनंजनयति। एतत्पर्यावरणाय-अपिनहितकरंभवति। अस्माकंपर्वणः प्रायः सर्वाःक्रियाः प्रतीकात्मकानिसन्ति, तेषांआध्यात्मिकःअर्थःतस्यपृष्ठतःगुप्तः अस्ति।तेषांप्रतीकानाम्आध्यात्मिक-भावान्अवगन्तुं, स्वकीर्तुंच, अस्माकंशिक्षितस्यसंस्कृतेः चउद्देश्येषुअन्यतमः अस्ति। क्रोध मानमायालोभादिकषायानांमलानां ज्ञानरूपेण बृह्मणेन निवारणं कृत्वा आत्मविशुद्धिं साधयेत्। ततः आत्मज्ञानदीपं प्रज्वाल्यशुद्धोपयोगं सेवेत। एषा एव दीपावलौ आत्मानुभूतिः च मुक्तिपथस्य उपोद्घातः च।

**'प्राचीनतमः वीरनिर्वाणसंवत्सरः' आरब्धः**

भगवतः महावीरस्य निर्वाणदिने दीपोत्सवः प्रसिद्धो जातः।अतः ईसवीयसंवत्सरात् पञ्चशतसप्तविंशतिवर्षपूर्वं कार्तिककृष्णचतुर्दश्याममावास्यायां च स्वातिनक्षत्रे भगवानमहावीरः निर्वाणं गतः। ततः परं कार्तिकशुक्लैकादिनं प्रभृतिं 'वीरनिर्वाणसंवत्सरः' आरब्धः। जैनपरम्परायाःप्राकृत - संस्कृतभाषाणांप्राचीनग्रन्थेषु / पाण्डुलिप्यांअस्यबहवः प्रमाणानिसन्ति।

कल्पसुत्तागमे उल्लिखितमस्ति -

बीए दिवसे कत्तिय सुद्धपडिवयाएगोयमसामिस्सकेवलमहिमादेवेहिंकया, तेणंतंदिवसंनूयणवरिसारंभदिवसत्तणेणपसिद्धंजायं।[6]

'वीरनिर्वाणसंवत्सरः' भारतस्य प्राचीनतमः संवत्सरः अस्ति, यः हिजरी, विक्रम, शक, ईसवी इत्यादिसर्वेभ्यः पूर्वः मान्यते। राजस्थानप्रदेशस्य अजमेरजिलायां वडलीग्रामे प्राप्तः शिलालेखः अस्य प्रमाणं दत्तवान्।तत्र '८४ वीरसंवत्' इति लिखितं दृश्यते। अयं शिलालेखः भगवानमहावीरनिर्वाणात् अष्टचत्वारिंशदधिकवर्षे लिखितः। अतः ईसवीपूर्वं चतुश्चत्वारिंशदधिकचतुःशतवर्षेअयं संवत्सरः प्रचलितः इति निश्चितं।प्रसिद्धःइतिहासज्ञःडा.राजबलीपाण्डेलिखतियत् अशोकस्यपूर्वंशिलालेखेषुतिथिलेखनस्यपरम्परानासीत्, बडली-शिलालेखःअपवादःअस्तिइति।[7] अस्मिन्विषयेवाराणसी-नगरस्यकाशीहिन्दुविश्वविद्यालयस्यकला- संस्कृति-पुरातत्त्व-विभागस्यप्राध्यापकःप्रो. सुमन्केन्या- देशेआयोजिते अन्ताराष्ट्रियसम्मेलनेअत्यन्तंआधिकारिकंलेखनम्उपस्थापितवान्आसीत्।

संन्दर्भ

1.तिलोयपण्णत्ति,गाथा १/१२१९
2. पूज्यपादभारती ,निर्वाणभक्तिः,पृष्ठ १५१
3. रात्रौ अन्त्यस्य दिवसस्य आगमनस्य च मध्ये यः कालः प्रत्यूष्कालः इति कथ्यते ।
4. हरिवंशपुराणम् /सर्गः६६ /श्लोक १५-२१/पृष्ठ -८०५-६
5. 'चउप्पनमहापुरिसचरिय', गाथा ७८९
6. कल्पसूत्र ११६ 7. इंडियन पैलियो ग्राफी,पृष्ठ १८०

## उत्कले शक्तिपीठेषु प्रसिद्धा समलेश्वरी



प्रो. बनमाली बिश्वालः

तां जगज्जननीं वन्दे सम्बलपुरवासिनीम्।
शक्तिरूपां देवीं वन्दे वन्दे तां समलेश्वरीम्।।
ब्रह्माण्डमातरं वन्दे सरस्वतीस्वरूपिणीम्।
महालक्ष्मीं महाकालीं पश्चिमोत्कलरक्षिणीम्।।
शीतवातैर्महानद्याः यस्याः पुलकिता तनुः।
प्रफुल्ल-वदनां देवीं वन्दे तां समलेश्वरीम्।।
उत्कले शक्तिपीठेषु प्रसिद्धा समलेश्वरी।
महानद्यास्तटे देवी शक्तिरूपे प्रसिद्ध्यति।।
देवी ब्रह्माण्ड-माताऽस्ति सा जगज्जननी मता।
सा दुर्गा च महालक्ष्मीः महासरस्वती क्वचित्।।
सा सम्बलपुरस्यैव कुलदेवी प्रतिष्ठिता।
तत्क्षेत्रस्य विशिष्यैव मन्यते साऽपि रक्षिका।।
पश्चिमस्योत्कलस्यास्ति सा देवी मार्गदर्शिका।
पूरयत्येव भक्तानां माता सर्वाश्च कामनाः।।
राज्ञा चौहानवंशस्य मन्दिरं तद् विनिर्मितम्।
बलरामेन देवेन शताब्दे षोडशे क्वचित्।।
तेन या प्रतिमा दृष्टा वृक्षस्याधो महात्मना।
प्रतिमा सा ततो नीत्वा मन्दिरे सुप्रतिष्ठिता।।
अद्यत्वे तस्य पीठस्य परिक्रमाऽपि निर्मितः।
भव्यपरिसरश्चाद्य विभात्यहो मनोरमः।।
द्वाराणि चात्र चत्वारि चतुर्दिक्षु भवन्ति वै।
प्राङ्गणे पुष्करिण्येका तथाऽन्याः पार्श्वदेवताः।।
शोभां द्रष्टुं महानद्याः प्राचीरं निर्मितं महत्।
दृश्यश्रव्यप्रकाशैश्च चित्रं सायं प्रदर्श्यते।।
मन्दिराच्च बहिः स्तम्भो मन्दिरशोभावर्धकः।
सिंहश्च शौर्यमुद्रायां गर्भगृहस्य रक्षकः।।
गजपृष्ठे समारूढौ सिंहौ देव्याश्च वाहनौ।
स्थितौ प्रतीकरूपौ तौ मुख्यद्वारस्य पार्श्वयोः।।
महोत्सवाश्च पाल्यन्ते मन्दिरेऽपि विशेषतः।
शारद-नवरात्रं च नूआखाई-महोत्सवः।।
छत्तिशगढराज्याच्च झारखण्डात् क्वचित् पुनः।
विशिष्योत्कलराज्याच्च भक्तानां वै समागमः।।
सम्बलपुरपार्श्वे च दर्शनीयस्थलानि वै।
क्षेत्रस्यास्य च माहात्म्यं घोषयन्ति तु सर्वथा।।
हुमामन्दिरनाम्नाऽस्ति शिवालयो विलक्षणः।
वक्रो भूत्वा शताब्देभ्यो न पतित्वैव तिष्ठति।।
गच्छन्नासीद् गृहीत्वैव हनुमान् गन्धमादनम्।
मन्दिरशिखरं स्पृष्टं तेन वक्रं च मन्दिरम्।।
समीपे सन्ति चान्यानि स्थलानि चापि कानिचित्।
चर्चा न क्रियते तेषां विस्तारभयकारणात्।।


## श्रीव्यासयशोगीतिका



-डॉ. विपिनकुमारद्विवेदी

कनकमंजरीवृत्तम्
अयि कवीश्वर व्यास तावके,
भवतु मे नतिः पादपङ्कजे।
विहितमत्र यद्वाङ्मयन्त्वया,
नहि विवर्णने कोऽपि सक्षमः।।
कवनकोकिल श्रेष्ठबोधक,
मनुजमानसे भक्तिकारक।
भुवनपोषके चित्तयोजक,
भवतु मे नतिः पादयोस्तव।।
मधुरमाधवे प्रीतिवर्धन,
विकलमानसे हर्षकारक।
हृदयमन्दिरे देवदीपक,
भवतु वन्दनं ते पदे परम्।  ।।
विरहगीतिकागायने प्रभोः,
निपुणमानसस्त्वं विभासि हे।
द्रुपदपुत्रिकामानरक्षणे,
कवनकौशलं दृश्यते तव।।
भवति माधवो यत्र धर्मपः
परमभक्तिमानर्जुनो बली।
लसति निश्चितं सौख्यदो जयः,
मुनिवर त्वया घोषितं मुदा।।
अनृतसम्भृते कौरवे परं,
नवलशिक्षणं स्थापितं त्वया।
भवति यो भवे धार्मिको हृदा,
वहति जीवनेऽसौ जयं ध्रुवम्।
मुनिकुलश्रियं सन्दधाति यद्,
भुवनवन्दितं तत्पुराणकम्।
भवहिताय हे मुक्तये सताम्,
विरचितं त्वया ते नमो भृशम्।।
प्रथितभारतं मञ्जुला कृतिः,
जगति पञ्चमो वेद उच्यते।
परमभक्तिदं भासते कलौ,
विरचितं त्वया ते नमो मम।।
वहति निर्झरी ज्ञानरूपिणी,
क्वणति मोहहं दिव्यगुञ्जनम्।
भगवतश्च सा गीतिका शुभा,
भुवनबन्धहा वर्णिता त्वया।।
भवतु मानुषं यन्त्रितं मनः,
न फलचिन्तने स्याद्धि कर्मणि।
अधिगतं च यत् सम्प्रदाय तद्,
भवपहेतवे जायते नहि।।
वसति साधकः कृष्णमन्दिरे,
रसमये पुनर्याति नो जगद्।
गलितबन्धनो नन्दनन्दनम्,
विमलदर्शनं वीक्षतेऽनिशम्।।

## आयाहि हे प्रिये



डॉ.शशिकान्ततिवारी
'शशिधरः'

हृदयं ममेह वेपते आयाहि हे प्रिये!
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
क्व वदानि किं लिखानि नो रमते मनः क्वचित्।
विषमा स्थितिस्समागता नहि याहि हे प्रिये!
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०१।।
स्वकरे करं निधाय मे भ्रमसि स्म त्वं सदा
सततं हृदा स्मराम्यहं नहि याहि हे प्रिये!।
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०२।।
यदि जीवनं त्वया सखे! मरणं त्वया सह।
कृत्वा समस्तकल्पनां क्व प्रयाहि हे प्रिये!
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०३।।
काव्येन ते हि सुश्रुषा बहुधा कृता मया।
कवितापि रोदितीह हा नहि याहि हे प्रिये।
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०४।।
करवाणि किं मनोद्य मे ननु व्यग्रताङ्गतम्।
गरलं करेण पाययेः नहि याहि हे प्रिये।
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०५।।
सोढुं न शक्यते मया हि वियोगपीडनं
सहासाद्य मारयेः परं नहि याहि हे प्रिये!।
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०६।।

अटनं सहैव भोजनं शयनञ्च जागृतिः।
यान्तीह नैव विस्मृतिं नहि याहि हे प्रिये!।
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०७।।
शक्नोम्यहं न जीवितुं शशिकान्त ते विना
प्रोक्तं त्वया हि मन्दिरे नहि याहि हे प्रिये!
एकाकिनं विहाय मां नहि याहि हे प्रिये।।
हृदयं..........................................।।०८।।
हृदयं ममेह वेपते आयाहि हे प्रिये!
एकाकिनं विहाय मां नहि याहि हे प्रिये।।

## वरगडः समृद्धोऽस्ति संस्कृत्या पश्चिमोत्कले

वरगडः समृद्धोऽस्ति संस्कृत्या पश्चिमोत्कले।
मथुरानगरी चात्र गोपपुर्यत्र वर्तते।।
रंगमंचश्च मुक्तोऽत्र विश्वे वृहत्तमो मतः।
प्रायो दशदिनान्यत्र धनुयात्रा प्रवर्तते।।
कंसदरबारश्चात्र तेषु दिनेषु दृश्यते।
यद्यद्वदति कंसोऽत्र तत् सर्वं परिपाल्यते।।
तदा कंसस्य राजत्वं वरगडेऽनुभूयते।
तदानीं सर्वकारीयं निष्क्रियं वै प्रशासनम्।।
यद्यपि न च शक्याऽत्र राजतन्त्रस्य बाध्यता।
परन्तु भक्तिभावाच्च स्वीकुर्वन्ति समेऽपि तत्।।
कालीमन्दिरमत्रत्यं प्रसिद्ध्यति च सर्वथा।
दिव्याऽस्ति प्रतिमा चात्र महाकाल्यास्तु मन्दिरे।।
सन्ति परिक्रमाभित्तौ महाविद्याः दश क्वचित्।
हनुमांश्च, गणेशश्च शिवोऽपि पार्श्वदेवताः।।
नगरे तोरणान्येव सीमानिर्धारकाणि वै।
क्षेत्रस्यारम्भमन्तं च सूचयन्ति क्वचित् पुनः।।
समीपे दर्शनीयानि प्रसिद्धानि स्थलानि वै।
पर्पाटदेवी तत्रानतिदूरे विराजते।।
सम्बलपुरि-वस्त्राणां प्राचुर्यमत्र दृश्यते।
उचितमूल्यमत्रास्ति वस्त्राणामिति कथ्यते।।
तन्तशाला प्रसिद्धाऽत्र वस्त्रक्रयणहेतवे।
आपणानि तथाऽन्यानि विलसन्ति स्थले स्थले।।
वरगड-समीपेऽस्ति पर्वतो गन्धमादनः।
यत्रास्ति देवधाराख्यं ख्यातं जलप्रपातकम्।।
पद्मपुरे प्रसिद्ध्यन्ति मन्दिराण्यपि कानिचित्।
पीठं नृसिंहनाथस्य हरिशंकरमन्दिरम्।।
एवं सोनपुरे चास्ति श्रीक्षेत्रद्वयमेव च।
पाताल्याख्यं द्वितीयाख्यं श्रीक्षेत्रमत्र राजते।।

## कालिदासीयगोसेवा

गोसेवनं यद्विहितं प्रशस्तम्,
राज्ञा दिलीपेन यशोऽधिपेन।
तत्केवलं सम्भवमेव काव्ये,
हे कालिदास प्रथिते त्वदीये।।
निवर्त्य सैन्यं दयितां स्वकीयाम्,
निवृत्तचेता निजराज्यभाराद्।
विहाय राजोचितदिव्यवस्त्रम्,
धेनोस्सुसेवानिरतो दिलीपः।।
सर्वाः क्रिया यस्य परं निबद्धाः,
धेन्वा सुराणां जलपानभोज्याः।
धेनोः कृतेऽयं विहरन्दिलीपः,
सुचित्रितो हे कविकालिदास।।
परं तपस्वी नृपतिर्दिलीपः,
सुताभिकांक्षी रविवंशदीपः।
स्थितः स्थितायां चलितो गतायाम्,
जलारतायां विहितो जलार्थी।।
हिंसारता ये विपिने बलिष्ठाः,
सिंहादयो दुष्टविशेषसत्त्वाः।
आगत्य तेनैव सुशिक्षिताश्च,
त्वया कृतं हे वनमेव शान्तम्।।
सेवाकृते योऽर्पितवान् स्वदेहम्,
राज्यस्य चिन्तां कृतवान्न किञ्चिद्।
सेवा हि धर्मः परमो वरेण्यः,
त्वया दिलीपे खलु दर्शितश्च।।
सेवाफलं प्राप्य न धैर्यहीनः,
गुरोः समीपे प्रथमं निवेद्य।
असौ च दुग्धं निपपौ त्वया हे,
सन्दर्शितो गोगुरुभक्तिभावः।।

## यायावरोहम्



डा. महेशनारायणशास्त्री
कुरेडा, टोङ्क, राजस्थानम्

यायावरोऽहम्
आं, यायावरोऽहम्।

नो वस्तु वासो,
न च सीमाबन्धः,
क्षितिजाह्वानमेव मे दिक्,
पाषाणाकीर्णमार्गा एव मत्सखायः।

यायावरोऽहम्
पदचिह्नगणं त्यजामि कालरेणुषु,
प्रवहाम्यहं कदाचित् तटिनीकलकलनिनादेषु,
कदाचिच्च मग्नोऽहं भवामि नगनीरवतायाम्।

यायावरोऽहम्
स्मृतिग्रन्थिर्बद्धास्ति मे स्कन्धयोः,
प्रत्येकस्मिन् विरतौ वर्तते कथैका,
प्रस्थाने च नवसम्भावनैका।

यायावरोऽहम्
नो मद्भवनं भित्तिषु,
प्रत्युत वर्तते गगनच्छायायां,
मदर्थं न लक्ष्यं प्रत्युत यात्रास्ति।

आं, यायावरोऽहम्
जीवनस्यापरिचितपथिकः,
यो हि जानाति -
नित्यं गमनमेव अस्तित्वमस्ति संगीतस्य.........

# 'वक्रोक्तिः' काव्यजीवितमेकमनुशीलनम्

डॉ. मञ्जूषा चन्ने (ठेमदेवः)
केन्द्रीयसंस्कृतविश्वविद्यालयः,
एकलव्यपरिसरः, अगरतला, त्रिपुरा

जगत्त्रितयवैचित्र्यचित्रकर्मविधायिनम्।
शिवं शक्तिपरिस्पन्दमात्रोपकरणं नुमः॥

इत्येवं राजानककुन्तकप्रणीतस्य 'वक्रोक्तिजीवितम्' इति अलङ्कारग्रन्थस्य मङ्गलश्लोकः ग्रन्थविषयदृशा सार्थकं बाभाति। यतो ह्यत्र यथा वैचित्र्यपूर्णजगतः चित्रकर्मविधायीशिवः तथा वैचित्र्यपरिपूर्णकाव्यजगतः चित्रकारः महाकविरेव। स्वीयप्रतिभया नानाविधकाव्यसौन्दर्यतत्त्वैः महाकविरसौकाव्यबन्धे सहृदयाह्लादकारकत्वं जनयति। काव्यशोभाधायकानि कानि कानि इमानि तत्त्वानि सन्ति? इत्येते विषयाः काव्यशास्त्रविद्भिः बहुधा परिचर्चिताः। किञ्च 'जगत्त्रितयवैचित्र्यमि'व काव्यजगत्यपि काव्यचारुत्वसम्पादकहेतुषु आलङ्कारिकाणां मतवैचित्र्यमवलोक्यते। तत्र हि गुणालङ्कारवृत्तिरसादयः विभिन्नाः चारुत्वहेतवः विदितचराः। एवमेव काव्यजीवातुत्वेनापि अलङ्कारशास्त्रे नैकानि मतानि उपस्थापयामासुः आलङ्कारिकाः। तेषु षट् मतानि सम्प्रदायत्वेन वा प्रस्थानत्वेन वा सुप्रसिद्धानि। तानि च सन्ति - भरतमुनिप्रवर्तितं रसप्रस्थानं, भामहसम्मतम् अलङ्कारप्रस्थानं, वामननिरूपितं रीतिप्रस्थानं, आनन्दवर्धनविवेचितं ध्वनिप्रस्थानं, क्षेमेन्द्राभिप्रेतम् औचित्यप्रस्थानं, राजानककुन्तकप्रतिपादितं वक्रोक्तिप्रस्थानञ्चेति।

वस्तुतः इमे सर्वे सम्प्रदायाः काव्यस्य प्रधानतत्त्वं किम्? अथवा काव्यस्यात्मा कः? इति विचारमाश्रित्यैव प्रवर्तिताः। अतः समेषाम् आलङ्कारिकसम्प्रदायानां सम्प्रदायप्रवर्तकानाञ्च काव्येशास्त्रेषु विशिष्टस्थानं वरीवर्ति।

अत्र हि राजानककुन्तकस्य वक्रोक्तिसिद्धान्तमवलम्ब्य चर्चा विधास्यते। वस्तुतस्तु 'प्रसिद्धकथनरीतितः भिन्ना चमत्कारिणी उक्तिः सा वक्रोक्तिः' इति मत्वा काव्यस्य प्राणरूपेण प्रतिष्ठापिता कुन्तकाचार्येण। किन्तु सर्वविदितमेव यदुक्तं सम्बन्धो शब्दार्थाभ्यां भवति। तेन हि वक्रोक्तिः शब्दार्थधर्मो वर्तते। अपि च शब्दार्थौ काव्यस्य शरीरवत् मन्यतेतेन हि शरीरधर्मोऽलङ्कार एव भवितुमर्हति, न तु आत्मा।एवंयद्यपि वक्रोक्तेः काव्यात्मता नाङ्गीक्रियते काव्यतत्त्वविधायिभिः तथापि कुन्तकाचार्यस्य साहित्यशास्त्रे महदवदानं निवारयितुमशक्यमेव।

राजानककुन्तकपरिचयः -

काश्मीरप्रान्ते लब्धजन्मा वक्रोक्तिसम्प्रदायप्रवर्तकः राजानककुन्तकः 'वक्रोक्तिजीवितम्' इत्येकम् अलङ्कारग्रन्थं विरचय्य काव्यशास्त्रे महत्त्वपूर्णस्थानमलभत। अस्य कुन्तकस्य कालः दशमख्रिष्टशताब्द्याः उत्तरार्धस्य प्रारम्भभागो अनुमन्यते। यतो हि कुन्तकेन वक्रोक्तिजीविते आनन्दवर्धनः राजशेखरश्च चर्चितौ। तस्मादेव स्फुटं यत् कुन्तकः आनन्दवर्धनात् राजशेखरात् च अर्वाचीन इति।

कुन्तकाचार्योऽयं महान् आलङ्कारिकस्सन् महाकविश्चापि आसीदित्यस्य प्रमाणमस्ति ग्रन्थस्य मङ्गलाचरणमतस्मादेव तस्य कवित्वं नितरां मुखरितं भवति। काव्यशास्त्रवैदुष्ये तु तदीयं वक्रोक्तिजीवितमेव प्रमाणम्।

वक्रोक्तिजीवितम् -

वक्रोक्तिरेव जीवितमिति वक्रोक्तिजीवितम्। तदधिकृत्य विरचितः ग्रन्थः 'वक्रोक्तिजीवितम्' इति ग्रन्थाभिधानव्युत्पत्तिः भवितुमर्हति। एवं ग्रन्थस्य नामकरणादेव विषयप्रस्तुतिरिति काव्यशास्त्रग्रन्थवैशिष्ट्यमत्रापि सन्दृश्यते।

'लोकोत्तरचमत्कारकारिवैचित्र्यसिद्धये।
काव्यस्यायमलङ्कारः कोऽप्यपूर्वो विधीयते'॥

इति ग्रन्थप्रयोजनं प्रतिपाद्य चतुर्वर्गप्राप्तिः, समुचितव्यवहारज्ञानम् काव्यविदाम् अन्तःचमत्कारश्चेति त्रिविधंकाव्यप्रयोजनं न्यरूपयत् वक्रोक्तिकारः कुन्तकः। ग्रन्थेऽस्मिन् चत्वारः उन्मेषास्सन्ति। प्रत्येकमुन्मेषस्याऽन्ते 'इतिश्रीराजानककुन्तकविरचिते वक्रोक्तिजीविते काव्यालङ्कारे प्रथमोन्मेषः वा द्वितीयोन्मेषः वा' इति उल्लेखः समुपलभ्यते। ग्रन्थोऽयं प्रकारान्तरेण त्रिधा विभक्तुं शक्यते - कारिका, वृत्तिः उदाहरणञ्चेति।

अस्य प्रथमोन्मेषे काव्यस्य सामान्य-विशेषात्मकं लक्षणम्, स्वभावोक्तेः अलङ्कारतायाः खण्डनम्, वक्रोक्तेः अलङ्कारतायाः साधनम्, वक्रोक्तेः षट् प्रकाराणां सोदाहरणं विवेचनम्,कविप्रस्थानमार्गत्रयस्यतद्गुणानां च प्रदर्शनमित्येते विषयाः विवेचिताः। वस्तुतः सम्पूर्णवक्रोक्तिप्रपञ्चः संक्षेपेण अस्मिन्नैव उन्मेषे परिलक्ष्यते। त्रिषु उन्मेषेषु वक्रोक्तिभेदानां तेषाम् उपभेदानाञ्च सविस्तरं विश्लेषणं समकरोत् कुन्तकः।

द्वितीयोन्मेषे वर्णविन्यासवक्रता, पदपूर्वार्द्धवक्रता तथा च प्रत्ययाश्रयवक्रता सभेदं सविस्तृतञ्च व्याख्याताःतृतीयोन्मेषे वस्तुवक्रतायाः तथा च वाक्यवक्रतायाः निरूपणप्रक्रिया समासाधिता। चतुर्थे उन्मेषे प्रकरणवक्रता प्रबन्धवक्रता चेति प्रतिपादिते। एवञ्कारेण 'वक्रोक्तिरेव काव्यजीवातुभूता' इति सिद्धान्तं प्रतिपादयितुमेव राजानककुन्तकस्य अयं ग्रन्थरचनाव्यापारः।

वक्रोक्तेः स्वरूपम् - का नाम वक्रोक्तिः? 'वक्रा उक्तिः वक्रोक्तिः' इति सामान्यतः वक्तुं शक्यते। अस्याः वक्रोक्तेः प्रयोगः संस्कृतसाहित्ये प्राचीनकालादेव भवति।भामहानुसारेण वक्रोक्तिः सर्वान् अलङ्कारान् उपस्करोति। तथा चोक्तं भामहस्य काव्यालङ्कारे - 'वक्राभिधेयशब्दोक्तिरिष्टावाचामलङ्कृतिः' (१/३६) तथैव

'सैषा सर्वैव वक्रोक्तिरनयाऽर्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना'॥ इति। (काव्या.- २/८५)

अस्मिन् विषये दण्डिः आह-श्लेषप्रयोगेण वक्रोक्तौ चमत्कारः सञ्जायते। एवं वक्रोक्तिः श्लेषाधारितः भाषणस्य चमत्कारमयः मार्गोऽस्ति। तथाहि - 'श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्। भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्'॥ (काव्यादर्शः - २/३६३)

एवमेव 'वाचा वक्रार्थशब्दोक्तिरलङ्कारस्य कल्पते' इति लोचनकारेणापि भामहस्य वचनमुद्धृतमस्ति। तथा च लोचनकारः इमां पङ्क्तिमेवं व्याख्याति -'शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन स्वरूपेणावस्थानम्' इति। अनेन व्याख्यानेन कुन्तकस्य वक्रता काचित् प्रभाविता प्रतिभाति। वामनाचार्यः वक्रोक्तिं केवलमेकमलङ्काररूपेण अङ्गीकृतवान। तथा चाह - 'सादृश्याल्लक्षणा वक्रोक्तिरि'ति। तेन हि इत्थं वक्तुं शक्यते यत् वक्रोक्तिसिद्धान्तस्य उत्पत्तिः अलङ्कारसम्प्रदायादभूदिति।

वक्रोक्तिकारस्तु काव्यस्य आत्मत्वेन वक्रोक्तिं स्वीकरोति। सः शब्दार्थयोः प्रसिद्धस्वरूपातिरिक्तमन्यदेव रूपान्तरमभिधाय न तावन्मात्रमेव काव्योपयोगि , किन्तु वैचित्र्यान्तरविशिष्टमित्याह -वक्रोक्तिः प्रसिद्धाभिधानव्यतिरेकिणी विचित्रैवाभिधा। सः वक्रोक्तेः लक्षणमेवं विवृणोति -

उभावेतावलङ्कार्यौ तयोः पुनरलङ्कृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिः॥ (वक्रो. - १/१०)

तात्पर्यं यत् द्वावपि शब्दार्थौ अलङ्करणीयौ केनापि शोभातिशयकारिणालङ्करणेन। तयोः द्वयोः अलङ्कारः वर्तते वक्रोक्तिरेव इति। इयं वक्रोक्तिः कीदृशी - वैदग्ध्यभङ्गीभणितिः। वैदग्ध्यं विदग्धभावः कविकर्मकौशलं, तस्य भङ्गी विच्छित्तिः, तया भणितिः विचित्रैवाभिधा वक्रोक्तिः इत्युच्यते। स्पष्टमेव यत् प्रसिद्धार्थकथनव्यतिरिक्ता विचित्रा उक्तिः वक्रोक्तिरिति। इयं कविव्यापारवक्रता कतिविधा स्यादस्मिन् विषये व्याचष्टे वक्रोक्तिकारः - कविव्यापारवक्रत्वप्रकाराः सम्भवन्ति षट्।

प्रत्येकं बहवो भेदास्तेषां विच्छित्तिशोभिनः॥ (वक्रो. - १/१८)

अत्र वक्रतायाः षड्भेदाः निगदितास्सन्ति। ते च यथा -

वर्णविन्यासवक्रत्वं पदपूर्वार्धवक्रता।
वक्रतायाः परोऽप्यस्ति प्रकारः प्रत्ययाश्रयः॥ (वक्रो.-१/१९)
वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा। (वक्रो.-१/२०)
वक्रभावः प्रकरणे प्रबन्धे वाऽस्ति यादृशः। (वक्रो. १/२१)

अर्थात् - १) वर्णविन्यासवक्रता २) पदपूर्वार्धवक्रता ३) प्रत्ययाश्रयवक्रता ४) वाक्यवक्रता ५) प्रकरणवक्रता ६) प्रबन्धवक्रता चेति। सम्प्रति तेषां प्रकाराणां वर्णनं प्रस्तूयते।

१) वर्णविन्यासवक्रता - वर्णानां विन्यासः वर्णविन्यासः अर्थात् अक्षराणां विशिष्टन्यसनं तस्य वक्रभावः वर्णविन्यासवक्रतेति। अत्र वक्रत्वं नाम प्रसिद्धप्रस्थानव्यतिरेकिणा वैचित्र्येणोपनिबद्धः संनिवेशविशेषविहितः तद्विदाह्लादकारी शब्दशोभातिशयः। एतदेव वर्णविन्यासवक्रत्वं चिरन्तनेष्वनुप्रास इति प्रसिद्धम्।

२) पदपूर्वार्धवक्रता - पदस्य सुबन्तस्य तिङन्तस्य वा यत्पूर्वार्धं प्रातिपदिकलक्षणं धातुलक्षणं वा तस्य वक्रभावः पदपूर्वार्धवक्रतेति। सर्वविदितमेव यत् पदं सुबन्तं तिङन्तञ्चेति द्विविधमिति। तत्र हि सुबन्तस्य पूर्वार्धं प्रातिपदिकं तिङन्तपदस्य च पूर्वार्धं धातुः इत्यभिधीयते। तेषां वैचित्र्यमेव पदपूर्वार्धवक्रतेति। तद्नु सुबन्तपदपूर्वार्धवक्रतायाः अष्टौ भेदाः। ते च यथा -

-रूढिशब्दवक्रता -यत्र रूढिशब्दस्यैव प्रकरणाद्यनुकूलत्वेन वाच्यप्रसिद्धधर्मान्तराध्यारोपगर्भत्वेन निबन्धः भवति।

-संज्ञाशब्दवक्रता - यत्र संज्ञाशब्दस्य वाच्यप्रसिद्धधर्मस्य लोकोत्तरातिशयेन अध्यारोपं विधाय गर्भितार्थस्य उपनिबन्धं क्रियते।

-पर्यायवक्रता- यत्रानेकशब्दाभिधेयत्वे वस्तुनः किमपि पर्यायपदं प्रस्तुतानुगुणत्वेन प्रयुज्यते तत्र अयं वक्रताप्रकारः।

- उपचारवक्रता -उपचारो नाम लक्षणा। यत्र लक्षणया मूर्तद्रव्यस्याभिधानेनअमूर्तद्रव्यस्य कथनम्

अथवा अमूर्तद्रव्यस्याभिधानेन मूर्तस्यकथनं क्रियते तत्रोपचारवक्रता भवति।

-विशेषणवक्रता-यत्र विशेषणमाहात्म्यादेव तद्विदाह्लादकारित्वलक्षणं वक्रत्वमभिव्यज्यते।

-संवृतिवक्रता-यत्र पदार्थस्वरूपं प्रस्तावानुगुण्येन केनापि निकर्षेणोत्कर्षेण वा युक्तं पदार्थस्वरूपं व्यक्ततया साक्षादभिधातुमशक्यं सत् संवृतिसामर्थ्योपयोगिना शब्देनाभिधीयते।

-वृत्तिवैचित्र्यवक्रता -यत्र अनेकासु वृत्तिसूपस्थितासु कृत्तद्धितसमाससनाद्यन्तैकशेषरूपेषु कासाञ्चिद् विचित्राणामेव वृत्तीनां कविभिःपरिग्रहः क्रियते।

-लिङ्गवैचित्र्यवक्रता -यत्र भिन्नलिङ्गानामपि शब्दानां वैचित्र्याय सामानाधिकरण्योपनिबन्धं क्रियते।

-तिङन्तपदपूर्वार्धवक्रता - अयं वक्रताप्रकारः क्रियावैचित्र्यवक्रताइत्यपि अभिधीयते। यत्र क्रियावैचित्र्यप्रतिपादनपरत्वेन

वैदग्ध्यभङ्गीभणितिरमणीयान् प्रयोगानिबध्नन्ति कवयः। इदं क्रियावैचित्र्यं बहुविधं विच्छित्ति-विततव्यवहारं दृश्यते।

इत्थमस्याः वक्रतायाः नवभेदाः परिकल्पितास्सन्ति कुन्तकाचार्येण।

३) पदपरार्धवक्रता-पदपरार्धवक्रतायाः तात्पर्यमस्ति प्रत्ययाश्रयवक्रतेति। यत्र सुप्प्रत्ययमाश्रित्य तिङ्प्रत्ययमाश्रित्य वा वक्रता चमत्कारपूर्णा भवति तत्र पदपरार्धवक्रता इत्यभिधीयते। तत्र सुप् प्रत्ययाश्रितवक्रतायाः संख्यावैचित्र्यं कारकवैचित्र्यञ्चेति भेदद्वयमङ्गीकृतम्। तिङ्प्रत्ययाश्रितवक्रतायाश्च पुरुषवैचित्र्यमित्येकः प्रकारः।

४) वाक्यवक्रता -वाक्यस्य वक्रभावोऽन्यो भिद्यते यः सहस्रधा।
यत्रालङ्कारवर्गोऽसौ सर्वोऽप्यन्तर्भविष्यति॥

अत्र वाक्यस्य अर्थात् पदसमुदायभूतस्येति। कुन्तकमतानुगुणं आख्यातं साव्ययकारकविशेषणं वाक्यमिति यस्य प्रतीतिस्तस्य श्लोकादेर्वक्रभावः वाक्यवक्रता। अयं वाक्यवक्रभावः सहस्रधा भिद्यते। यतो हि प्रायः प्रसिद्धः सर्वोऽपि अलङ्कारवर्गः अत्रैवान्तर्भवति।

५)प्रकरणवक्रता -प्रकरणे मूलकथायां परिवर्तनेन परिवर्धनेन कल्पनया वा या रमणीयता सा प्रकरणवक्रतेति कथ्यते। अर्थात् इयं वक्रता त्रिविधा प्रवर्तते। क्वचित् स्वाभाविकवर्णनया, कदाचित् प्रतिभया विषयवस्तुपरिवर्त्य वर्णनया कुत्रचित् तु कल्पनावैशिष्ट्येन वर्णनया। अत्रत्यः वक्रभावः सहजाहार्यसौकुमार्यमनोहरः वर्तते।

६) प्रबन्धवक्रता -प्रबन्धवक्रता प्रायेण सर्वासां पूर्वोक्तानां पञ्चविधानां वक्रतानां सम्मिश्रणरूपा भवति। प्रबन्धगता अर्थात् महाकाव्यखण्डकाव्यादिगता वा वक्रता प्रबन्धवक्रतेति। अयमपि वक्रभावः सहजाहार्यसौकुमार्यमनोहरः भवति।

एवं षण्णां वक्रतानां व्याख्यानं विधाय क्रमप्राप्तस्य बन्धस्य विवेचनं कृतं ग्रन्थकारेण। अत्र 'बन्धः' इति पदेन काव्यरचनारूपः कविव्यापारोऽभिप्रेतः। शब्दार्थयोः सौभाग्यपरिवर्धकः लावण्यगुणस्य परिपोषकः यः वाक्यविन्यासः स बन्धः इति। तथा हि -

वाच्यवाचकसौभाग्यलावण्यपरिपोषकः।
व्यापारशाली वाक्यस्य विन्यासो बन्ध उच्यते॥(वक्रो. - १/२२)

तत्र कविस्वभावभेदनिबन्धनत्वेन अर्थात् कविप्रतिभाभेदत्वात् काव्यरचनायां हेतुभूताः त्रयः पन्थानः सम्भवन्ति। तद्नु काव्यस्य त्रयः मार्गाः प्रोक्ताः।

सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।
सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः॥(वक्रो. - १/२४)

अत्र हि सुकुमारमार्गे रसभावयोः प्रधानता विलसति। विचित्रमार्गे अलङ्काराणां प्राधान्यं भजते। तथा च मध्यममार्गे विचित्रसुकुमारमार्गयोः सम्मिश्रणं दृश्यते। तात्पर्यमिदं यत् सुकुमारमार्गस्य विचित्रमार्गस्य च सम्पदः परस्परम् उत्कर्ष-स्पर्धया राराजते इति। ततश्च तेषां त्रयाणां मार्गाणां चत्वारः गुणाः विवक्षिताः। ते च सन्ति - प्रसादः, माधुर्यम्, लावण्यम् अभिजात्यम् चेति।

अयं काव्यमार्गः नाम वामनादिभिः विवेचिता रीतिः। एभिः प्राचीनैः आचार्यैः विदर्भादिदेशविशेषाणां समाश्रयेण वैदर्भीप्रभृतयः तिस्रः रीतयः समाम्नाताः। तासां च उत्तममध्यमाधमत्ववैचित्र्येण त्रैविध्यं प्रदर्शितम्। किन्तु कुन्तकमतेन इदं नोचितम्। यतो हि देशभेदनिबन्धनत्वे रीतिभेदानां देशानाम् आनन्त्यात् असंख्यत्वं प्रसज्यते। वस्तुतः साहित्यशास्त्रे मार्ग-रीति-शैलीगुणसंघटनाप्रभृतयः शब्दाः प्रायेण एकार्थकाः।

इदमपि अवधेयमत्र यत् 'काव्यस्यात्मा ध्वनिः' इति प्रतिपादयताध्वन्यालोककारेण आनन्दवर्धनेन यत् पदम्, प्रकृतिः, प्रत्ययः, वाक्यम्, प्रकरणं प्रबन्धश्चेति सर्वाणि रसादेः व्यञ्जकानि समासादितानि। इयमेव पदादीनां व्यञ्जकता कुन्तकेन वक्रताशब्देन समाश्रितेति। अन्यच्च पदादीनां व्यञ्जकत्वस्य यानि उदाहरणानि ध्वन्यालोके प्रदर्शितानि तान्येव वक्रोक्तिजीवितकारेणऽपि प्रदत्तानि। अतो वक्तुं शक्यते यत् वक्रोक्तेर्मूलं ध्वनिरेव ( व्यञ्जनैव) वर्तते। ध्वनेः वक्रोक्तेश्च साम्येवं द्रष्टुं शक्यते -

वर्णध्वनिः (वर्णव्यञ्जकता) - वर्णविन्यासवक्रता
पदध्वनिः - पदवक्रता
अविवक्षितवाच्यध्वनिः - पदपूर्वार्द्धवक्रता
अर्थान्तरसङ्क्रमितवाच्यध्वनिः - रूढिवैचित्र्यवक्रता
अत्यन्ततिरस्कृतवाच्यध्वनिः - उपचारवक्रता

कुन्तकस्य वैशिष्ट्यम् -

१) अलङ्कारग्रन्थस्य भिन्नप्रयोजनम् अलङ्कार्यकाव्यस्य भिन्नप्रयोजनं न्यरूपयत् कुन्तकाचार्यः। यतः तत्प्राचीनैः परवर्तिभिः वा केवलं काव्यप्रयोजनं प्रोक्तम्।

२) शब्दार्थस्य यथा व्याख्या आचार्यकुन्तकेन प्रादर्शि न तथा केनापि पूर्वाचार्यैः न वा पराचार्यैः।

३)वक्रोक्तिः काव्यजीवितरूपेण प्रतिष्ठाप्य नूतनप्रस्थानप्रदर्शनं विहितम्।

उपसंहारः - कुन्तको वक्रोक्तिप्रस्थानस्य प्रवर्तकत्वेन साहित्यपदार्थनिरूपकत्वेन च प्रसिद्धः। तेन काव्यलक्षणव्याख्यानप्रसङ्गे पञ्चतत्त्वानि प्रोक्तानि। तानि च सन्ति - १) शब्दार्थौ २) साहित्यम् ३) वक्रकविव्यापारः४)बन्धः ५) तद्विदाह्लादकारित्वम् चेति। सः'शब्दार्थयोः अन्यूनानतिरिक्तचमत्कारजनकत्वं साहित्यमि'ति साहित्यपदार्थस्यापि अद्वितीयं विवेचनं विधाय चमत्कारः काव्यस्य मुख्यं प्रयोजनमिति प्राचिख्यपत्। आचार्योऽयं वक्रोक्तेरालोके काव्यस्य व्यवस्थामकरोत्। सालङ्कारयोरेव शब्दार्थयोः काव्यत्वं तत्रापि अलङ्कारः वक्रोक्तिरेव इति अभिव्यनक्ति सः। इयं वक्रोक्तिरेव कथं काव्यजीवितमिति प्रतिपाद्य वक्रोक्तेः षट् प्रकाराः सोदाहरणं प्रदर्शिताः तेन। अतः अलङ्कारशास्त्रे कुन्तकः किमपि विशिष्टं स्थानं भजते इति तु निश्चप्रचमअतः कथ्यते -

वक्रानुरञ्जनीमुक्तिं चञ्चूमिव मुखे वहन्।
कुन्तकः क्रीडति सुखं कीर्तिस्फटिकपञ्जरे॥

# श्रीधामवृन्दावने मणिद्वीपभागवतसेवाश्रमस्य सप्तदिवसीयोद्घाटनमहोत्सवे वृहद् सन्तविद्वत्सम्मेलनम् आयोजितम्

वृन्दावननगर्यां चौतन्यविहारद्वितीयखण्डे नवनिर्मिते मणिद्वीपभागवतसेवाआश्रमे प्रवर्तमानस्य सप्तदिवसीयस्य उद्घाटनमहोत्सवस्य अन्तर्गतं शरद्पूर्णिमायाः पावनपर्वणि वृहद् सन्तविद्वत्सम्मेलनं सम्पन्नम्।



अस्मिन् अवसरे श्रीनाभपीठाधीश्वरः जगद्गुरुः स्वामी सुतीक्ष्णदासदेवाचार्यमहाराजः अवदत् यत्"शरद्पूर्णिमापर्व अतीव दिव्यं भवति। अस्य पावनस्य पर्वणः दिवसे 'भागवतभक्तः' आचार्यः प्रदीपमणिमहाराजः संस्थापितस्य मणिद्वीपभागवतसेवाआश्रमस्य उद्घाटनं जातमिति अतीव हर्षस्य विषयः अस्ति।"

श्रीमज्जगद्गुरुः स्वामी जयरामदासमहाराजः अवदत् – "आचार्यः प्रदीपमणिमहाराजः अतीव अल्पायुषि एव श्रीमद्भागवतकथया, श्रीरामकथया, अन्यैश्च धर्मग्रन्थैः देशे विदेशे च प्रभोर्भक्तेः प्रचारं कृत्वा असंख्यजनान् धर्ममार्गे स्थापयित्वा तेषां कल्याणं कृतवान्।"

श्रीपीपाद्वाराचार्यः जगद्गुरुः बाबाबलरामदासदेवाचार्यमहाराजः अवदत् यद् "आचार्यः प्रदीपमणिमहाराजः उदारः, परोपकारी, सेवाभावी च। अस्माकं पूर्णं विश्वासं यत् तस्य निर्देशनात् मणिद्वीपभागवतसेवाआश्रमः गौसेवा, सन्तसेवा, ब्रजवासिसेवा, दीनदुःखितजनसेवायां च नित्यं समर्पितो भविष्यति।"

श्रीमज्जगद्गुरुः स्वामी विश्वेशप्रपन्नाचार्यमहाराजः अवदत् – "अद्यतनकाले यः सनातनधर्मः विविधैः प्रकारैः आक्रम्यते, तस्य संरक्षणाय एतेषां आश्रमाणां स्थापना अत्यावश्यकं कार्यम्। यतः राष्ट्रस्य च धर्मस्य च रक्षणाय तयोः संस्कृतेः संरक्षणं परमावश्यकम्। संस्कृतिसंरक्षणेन एव धर्मो राष्ट्रं च सुरक्षितं ऊर्जस्वलं च भविष्यतः।"



अस्मिन् सन्तविद्वत्सम्मेलने जगद्गुरुः रामानुजाचार्यः स्वामी श्रीअनन्ताचार्यमहाराजः, महामण्डलेश्वरः श्रीदण्डीस्वामी रामदेवानन्दसरस्वतीमहाराजः, व्याकरणन्यायसाहित्यशास्त्रेषु परमविद्वान् डॉ. श्रीरामकृपालत्रिपाठिगुरुजीमहाराजः, भागवतभास्करः कृष्णचन्द्रठाकुरजीमहाराजः, डॉ. अनिरुद्धाचार्यमहाराजः, आचार्यः श्रीमारुतिनन्दनाचार्यवागीशमहाराजः, विश्वविख्यातः भागवताचार्यः डॉ. चतुरनारायणपाराशरः, पुराणाचार्यः डॉ. मनोजमोहनशास्त्री, धर्मरत्नः स्वामी बलरामाचार्यमहाराजः, आचार्यः रामविलासचतुर्वेदी, डॉ. अशोकशास्त्री, सन्तः श्रीदामकिंकरमहाराजः, श्रीरामकथामर्मज्ञः अशोकव्यासमहाराजः, "यूपीरत्न" उपाध्यालङ्कृतः प्रख्यातः साहित्यकारः डॉ. गोपालचतुर्वेदी, भागवताचार्यः विपिनबापुः, आचार्यः घनश्यामदुबे, डॉ. राधाकान्तशर्मा, आचार्यः युगलकिशोरकटारे, रासाचार्यः स्वामी रामशरणशर्मा, आचार्यः बुद्धिप्रकाशशास्त्री, धर्मवीरशास्त्री, प्रेमशरणशर्मा, आचार्यः नरोत्तमशास्त्री, आचार्यः नेत्रपालशास्त्री, प्रोफेस ऋषिकान्तः, डॉ. कौशलकिशोरः, पण्डितः श्यामसुन्दरब्रजवासी, सुमन्तकृष्ण इत्यादयः अपि स्वस्वविचारान् अभ्यदधुः।

मणिद्वीपभागवतसेवाआश्रमस्य संस्थापकः "भागवतभक्तः" आचार्यः प्रदीपमणिमहाराजः सर्वान् सन्तान् विद्वांसश्च उत्तरीयेण आच्छाद्य ठाकुरजीचित्रपटं पटुकां प्रसादीमालां च समर्प्य सादरं स्वागतं कृतवान्। ततः सन्तसेवा, ब्रजवासिसेवा, वैष्णवसेवा, वृहद्भोजनमहोत्सवश्च सम्पन्नः। मञ्चसञ्चालनं आचार्येण ऋषिकुमारतिवारिणा कृतम्






# केंद्रीयसंस्कृतविश्वविद्यालयेन राष्ट्रपतिभवनं प्रति संस्कृतपाण्डुलिपय ग्रन्थसङ्ग्रहं च समर्पितः

नवदेहली। केंद्रीयसंस्कृतविश्वविद्यालयस्य नवीदिल्लीस्थितस्य कुलपतिना प्रोफेसर् श्रीनिवासबरखेड़ीमहाभागेनः दुर्लभाः संस्कृतपाण्डुलिपयः ग्रन्थसङ्ग्रहः च नवीदिल्लीस्थितं राष्ट्रपतिभवनं प्रति समर्पितः। एषः संग्रहः संस्कृतस्य सहस्राब्दपरम्पराप्रवाहितविद्वत्परम्परायाः प्रतिनिधित्वं करोति, यस्मिन्



आयुर्वेद, साहित्य, पारम्परिकविद्याः च सम्बन्धिनः बहवः दुर्लभग्रन्थाः समाविष्टाः सन्ति। एताः पाण्डुलिपयः राष्ट्रपति भवनस्य भारतराष्ट्रपतिः महोदया इत्यस्य सचिवायै सुश्रीदीप्तिउमाशंकरमहाभागायै औपचारिकरूपेण समर्पिताः। अस्मिन् अवसरे प्रो बरखेड़ीमहाभागेन विश्वविद्यालयस्य पाण्डुलिपीनां संरक्षणे, डिजिटलीकरणे, प्रसारे च अनवरतं तदनुरागं प्रतिबद्धतां च विशेषतया उल्लिखितम्। ते अवदन् यत् "एषा पाण्डुलिपिसमर्पणा राष्ट्रपति भवनपुस्तकालयं समृद्धं करिष्यति तथा संस्कृतभारतीयज्ञानपरम्परायां रूचिं वहन्तः विद्वांसः शोधकाः च एतेषां ग्रन्थानां लाभेन नूनं अतिमूल्यवान् साधनं प्राप्स्यन्ति।" कार्यक्रमे श्रीसुनीलकुमारत्रिवेदी (विशेषकार्याधिकारी ख्र अनुसंधान), श्रीशिवेन्द्रचतुर्वेदी (निदेशक – प्रशासनशाखा), श्रीमती नविकागुप्ता (उपप्रेससचिवा) इत्यादयः राष्ट्रपति सचिवालयस्य नवदिल्लीस्थिताः अधिकारिणां गणोऽपि उपस्थितः। इति केंद्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिना पाण्डुलिपिसमर्पणवृत्तान्तः।

अस्माकं प्रेरणास्रोतः– स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
संरक्षक : डॉ रमेशचन्द्रपाण्डेयः (प्रसिद्धज्योतिषाचार्यः) , परामर्शकाः–डॉ.बलदेवानन्दसागरः, प्रो. वाचस्पति मिश्रः, प्रो.देवेन्द्रप्रसादमिश्रः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी,
सम्पादिका–मञ्जूशर्मा, सम्पादकमण्डलम् – डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, नरेन्द्रशर्माः, प्रबन्धसम्पादकौ–वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. – 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली–53तः मुद्रापयित्वा ए–2/32, वजीराबादमार्गः भजनपुरा, देहली–53 इत्यतः प्रकाशितम्।
Owner. Printer, Publisher and Editor MANJU SHARMA, Printed by Lakshy Printers, 521/8B, Ground Floor, Gali No. 14, Adharsh, Mohalla, Maujpur, Delhi-110053
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2024-26 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।